# फलतावच्छेदकसम्बन्धविचारः

नीरज-कुमार-भार्गवः

## भूमिका -

सप्तसु कारकेषु अन्यतमं कारकं भवति कर्म। तच्च फलाश्रयो भवति। कर्तुरीप्सिततमं कर्मेति सूत्रेण फलाश्रयस्यैव कर्मसंज्ञाविधानात्। यथा तण्डुलं पचतीत्यादौ विक्लित्तिरूपफलाश्रयः तण्डुलः कर्म भवति। ग्रामं गच्छतीत्यादौ च संयोगरूपफलाश्रयो ग्रामः कर्म भवति। किन्तु प्रकृते जिज्ञासा भवति केन सम्बन्धेन फलाश्रयत्वं विवक्षितमिति। तत्र येन केनापि सम्बन्धेन फलाश्रयत्वस्वीकारे कालिकसम्बन्धेन विक्लित्तिरूपफलाश्रयः कालो भवतु इति विवक्षायां कालस्य, कालिकसम्बन्धेन विक्लित्तिरूपफलाश्रयः पर्वतो भवतु इति विवक्षायां पर्वतस्य च विक्लित्तिरूपफलाश्रयत्वात् कालस्य पर्वतस्य च कर्मत्वापत्तौ कालं पचति, पर्वतं पचतीत्याद्यनिष्टप्रयोगापत्तिः। यदि चोक्तदोषवारणाय समवायसम्बन्धेनैव फलाश्रयत्वं कर्मलक्षणे विवक्षितमित्युच्यते तर्हि घटं जानातीत्यादौ घटस्य कर्मत्वं न स्यात् तस्य विषयतासम्बन्धेन ज्ञानरूपफलाश्रयत्वात्। यदि च कालिकान्यसम्बन्धेन फलाश्रयत्वं विवक्ष्यते, ततश्च न पर्वतं पचतीत्यादिप्रयोगापत्तिः, न वा घटं जानातीत्यादिप्रयोगानापत्तिः। तथापि जनकत्वसम्बन्धेन विक्लित्तिरूपफलाश्रयो व्यापारो भवतु इति विवक्षायां व्यापारं पचतीत्यादिप्रयोगापत्तिरिति। यदि च कालिकातिरिक्तवृत्तितानियामकसम्बन्धेन फलाश्रयत्वं विवक्षितम्, ततश्च जनकत्वसम्बन्धस्य वृत्तितानियामकत्वाभावात् जनकत्वसम्बन्धेन व्यापारस्य विक्लित्तिरूपफलाश्रयत्वेऽपि न व्यापारस्य कर्मत्वम्। तथापि विषयितासम्बन्धेन घटे ज्ञानमस्तीति प्रतीतेः विषयितासम्बन्धस्य वृत्तितानियामकत्वात्, विषयितासम्बन्धेन विक्लित्तिरूपफलाश्रयः ज्ञानं भवतु इतीच्छायां सत्यां ज्ञानस्य कर्मत्त्वापत्तौ ज्ञानं पचतीति प्रयोगापत्तिः। एवमेवान्येऽपि दोषाः भवन्ति। एवञ्च भवति जिज्ञासा केन सम्बन्धेन फलाश्रयत्वं विवक्षितमिति चेत् फलतावच्छेदकसम्बन्धेन फलाश्रयत्वं विवक्षितमिति। तथा चाह वादरत्नकारः "फलतावच्छेदकसम्बन्धेन फलाश्रयस्य

विवक्षणेन सकलदोषपरिहार इति" ।[1] एवमेव शास्त्रार्थरत्नावलीकारः प्रोवाच "अत्रोच्यते फलतावच्छेदकसम्बन्धेन फलाश्रयत्वनिवेशः"।[2] प्रौढमनोरमायायाः सरलाव्याख्यायामपि प्रोक्तम् " अत्र फलाश्रयता फलतावच्छेदकसम्बन्धेनैव विवक्षिता"।[3] लघुशब्देन्दुशेखरस्य विजयाव्याख्यायामपि प्रोक्तम् "फलाश्रयत्वञ्च फलतावच्छेदकसम्बन्धेन बोध्यम्, एवञ्च कालिकसम्बन्धेन पर्वतस्य विक्लित्तिरूपफलाश्रयत्वप्रकारकेच्छोद्देश्यत्वेऽपि पर्वतं पचतीत्यादयो न प्रयोगाः"।[4] एवमेव अन्येष्वपि ग्रन्थेषु प्रोक्तम्।

अथ फलतावच्छेदकसम्बन्धविचारः-

तत्र फलतावच्छेदकसम्बन्धो नाम क इति जिज्ञासायामाह सूर्यनारायणशुक्लः "फलतावच्छेदकः सम्बन्धश्च फलनिष्ठाधेयतावच्छेदकतया यो धात्वर्थतावच्छेदकः स एव। सर्वेषां च धातूनां फलविशिष्टव्यापारे शक्तिः, वैशिष्ट्यञ्च स्वजनकत्वस्वाधिकरणवृत्तित्त्वोभयसम्बन्धेन" ।[5] एवमेव महामहोपाध्यायः श्रीजयदेवमिश्रः " फलतावच्छेदकश्च फलनिष्ठाधेयतावच्छेदकतया यो धात्वर्थतावच्छेदकस्स एव। सर्वेषाञ्च धातूनां फलविशिष्टव्यापारे शक्तिः। वैशिष्ट्यञ्च स्वजनकत्वस्वाधिकरणवृत्तित्त्वोभयसम्बन्धेन"।[6]

चैत्रः तण्डुलं पचतीत्यत्र पचिधातोः विक्लित्तिविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणता-वद्वृत्तित्वम् इत्युभयसम्बन्धेन। अत्र स्वपदेन विक्लित्तिरूपफलस्य ग्रहणं कर्तव्यम्। तथाहि स्वं विक्लित्तिः, तज्जनकः अधिश्रयणादिरूपो व्यापारो वर्तते। अतो व्यापारे स्वजनत्वसम्बन्धेन पचिधातुवाच्यविक्लित्तिवैशिष्ट्यं वर्तते। ततश्च स्वजनकत्वसम्बन्धेन विक्लित्तिरूपफलविशिष्टो व्यापारः सञ्जातः। एवमेव विक्लित्तिरूपफलं तण्डुले वर्तते समवायसम्बन्धेन व्यापारोऽपि कालिकसम्बन्धेन तण्डुले वर्तते। ततश्च विक्लित्तिरूपफलम् आधेयः, अतस्तन्निष्ठा आधेयता, तण्डुलश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलं समवायेन तण्डुले वर्तत इति कृत्वा आधेयतावच्छेदकसम्बन्धः समवायः, अतः आधेयता समवायसम्बन्धावच्छिन्ना। एवञ्च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं विक्लित्तिरूपफलम्, तन्निष्ठा समवायसम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या तण्डुलनिष्ठा अधिकरणता,

तद्वान् तण्डुलः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन तण्डुले व्यापारस्य विद्यमानत्वात्। एवञ्च प्रकृते समवायसम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य विक्लित्तिरूपफलनिष्ठाधेयतावच्छेदकत्वे सति पचिधातुजन्योपस्थितीयविषयता-श्रयत्वात्। एवञ्च चैत्रः तण्डुलं पचतीत्यादौ समवायरूपफलतावच्छेदकसम्बन्धेन विक्लित्तिरूपफलस्याश्रयो भवति तण्डुल एव न तु पाषाणः, अतस्तण्डुलस्यैव कर्मसंज्ञा न तु पाषाणस्य तेन चैत्रः तण्डुलं पचतीति प्रयोगो भवति। चैत्रः पाषाणं पचतीति प्रयोगस्तु नैव भवति पाषाणस्य समवायेन विक्लित्तिरूपफलाश्रयत्वाभावात्। ततश्च सर्वत्रैव पचिसमानार्थकधातुघटितप्रयोगेषु फलतावच्छेदकसम्बन्धः समवाय एव। तथा चाह श्रीमान् जयदेवमिश्रः "तत्तद्धातुस्थले फलनिष्ठाधेयतावच्छेदकतया तत्तत्सम्बन्धो निवेश्यः यथा पच्धातोर्विक्लित्तिविशिष्टो व्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वस्वनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वोभय सम्बन्धेन। तथा च तत्र फलतावच्छेदकस्समवाय एव न तु कालिकादिः"।[7] एवमेव सूर्यनारायणशुक्लः जगाद "तत्तद्धातुस्थले फलनिष्ठाधेयतावच्छेदकतया तत्तत्सम्बन्धो निवेश्यः यथा पच्धातोर्विक्लित्ति- विशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वस्वनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वोभय सम्बन्धेन। तथा च तत्र फलतावच्छेदकः सम्बन्धः समवाय एव इति" ।[8] एवमेवान्यत्रापि ग्रन्थेषु प्रोक्तम्। प्रकृते विस्तरभयान्नोच्यते।

चैत्रः घटं नाशयतीत्यादिषु स्थलेषु नाशयतेः नाशविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नाधेयता-निरूपिताधितकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन। एवञ्चात्र प्रतियोगित्वसम्बन्धः फलतावच्छेदकसम्बन्धः। तथाहि नाशस्य जनकः मुद्गरप्रहारादिरूपव्यापारो भवति। एवञ्च तत्र व्यापारे स्वजनकत्वरूपः प्रथमः सम्बन्धः अस्ति। एवञ्च जनकत्वसम्बन्धेन नाशरूपफलविशिष्टो व्यापारः सञ्जातः। एवमेव फलम् अत्र नाशः, स च घटे वर्तते प्रतियोगित्वसम्बन्धेन। कालिकसम्बन्धेन व्यापारोऽपि घटे वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, घटश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलं प्रतियोगित्वसम्बन्धेन घटे वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः प्रतियोगित्वसम्बन्धः, अतः आधेयता

प्रतियोगित्वसम्बन्धावच्छिन्ना। एवञ्च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं नाशरूपं फलम्, तन्निष्ठा प्रतियोगित्वसम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या घटनिष्ठा अधिकरणता, तद्वान् घटः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन घटे व्यापारस्य विद्यमानत्वात्। एवञ्च प्रकृते प्रतियोगित्वसम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य नाशरूपरूपफलनिष्ठाधेयतावच्छेदकत्वे सति नाशिधातुजन्योपस्थितीयविषयताश्रयत्वात्। एवञ्च नाशार्थधातुप्रयोगे प्रतियोगित्वसम्बन्धेन नाशाश्रयस्य कर्मसंज्ञा भवति। तथा च प्राह श्रीमान् जयदेवमिश्रः " एवं नाशयतीत्यादौ नाशविशिष्टो व्यापारो धात्वर्थः। वैशिष्ट्यञ्च स्वजनकत्वस्वनिष्ठप्रतियोगित्व-सम्बन्धावच्छिन्नाधेयतानिरूपिता-धारतावद्वृत्तित्वो-भयसम्बन्धेन"।[9] तथा चाह सूर्यनारायणशुक्लः "एवं नाशयतीत्यादौ नाशविशिष्टो व्यापारो धात्वर्थः, वैशिष्ट्यञ्च स्वजनकत्व-स्वनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्ना-धेयतानिरूपिता-धारतावद्वृत्तित्वो-भयसम्बन्धेन" ।[10] एवमेवान्यत्रापि ग्रन्थेषु प्रतिपादितम्। प्रकृते विस्तरभयान्नोच्यते।

चैत्रः घटं जानातीत्यादिषु स्थलेषु जानातेः ज्ञानविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन। एवञ्चात्र विषयतासम्बन्धः फलतावच्छेदकसम्बन्धः। तथाहि ज्ञानस्य जनकः आत्ममनस्संयोगरूपव्यापारः भवति। एवञ्च तत्र व्यापारे स्वजनकत्वरूपः प्रथमः सम्बन्धः अस्ति। स्वं ज्ञानम्, तस्य जनको व्यापारः, जनकत्वं व्यापारे इति कृत्वा स्वजनकत्वरूपः प्रथमः सम्बन्धः गतः। फलम् अत्र ज्ञानम्, स च घटे वर्तते विषयतासम्बन्धेन। आत्ममनस्संयोगरूपो व्यापारः समवायसम्बन्धेन कर्तरि वर्तते किन्तु कालिकसम्बन्धेन व्यापारोऽपि घटे वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, घटश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलम् विषयतासम्बन्धेन घटे वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः विषयतासम्बन्धः, अतः आधेयता विषयतासम्बन्धावच्छिन्ना। एवञ्च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं ज्ञानरूपं फलम्, तन्निष्ठा विषयतासम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या घटनिष्ठा अधिकरणता, तद्वान् घटः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन घटे

व्यापारस्य विद्यमानत्वात्। एवञ्च प्रकृते विषयतासम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य ज्ञानरूपरूपफलनिष्ठाधेयतावच्छेदकत्वे सति ज्ञाधातुजन्योपस्थितीयविषयताश्रयत्वात्।

चैत्रः घटम् इच्छतीत्यादिषु स्थलेषु इच्छतेः इच्छाविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन। एवञ्चात्र विषयतासम्बन्धः फलतावच्छेदकसम्बन्धः। तथाहि इच्छायाः जनको ज्ञानरूपव्यापारो भवति। एवञ्च तत्र व्यापारे स्वजनकत्वरूपः प्रथमः सम्बन्धः अस्ति। स्वं ज्ञानम्, तस्य जनको व्यापारः, जनकत्वं व्यापारे इति कृत्वा स्वजनकत्वरूपप्रथमः सम्बन्धः गतः। एवं प्रकृते फलम् इच्छा, स च घटे वर्तते विषयतासम्बन्धेन। ज्ञानरूपो व्यापारः समवायसम्बन्धेन कर्तरि वर्तते किन्तु कालिकसम्बन्धेन व्यापारोऽपि घटे वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, घटश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलं विषयतासम्बन्धेन घटे वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः विषयतासम्बन्धः, अतः आधेयता विषयतासम्बन्धावच्छिन्ना। एवञ्च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं ज्ञानरूपं फलम्, तन्निष्ठा विषयतासम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या घटनिष्ठा अधिकरणता, तद्वान् घटः, तद्वृत्तित्वमपि ज्ञानरूपे व्यापारे वर्तते, कालिकसम्बन्धेन घटे व्यापारस्य विद्यमानत्वात्। एवं च प्रकृते विषयतासम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य इच्छारूपरूपफलनिष्ठाधेयतावच्छेदकत्वे सति पच्धातुजन्योपस्थितीयविषयता- श्रयत्वात्। एवञ्च ज्ञानार्थधातुप्रयोगे विषयतासम्बन्धेन ज्ञानरूपस्य फलस्य आश्रयः कर्म भवति। इच्छार्थकधातुप्रयोगेऽपि विषयतासम्बन्धेन इच्छाश्रयस्य कर्मसंज्ञा भवति। तथा चाह सूर्यनारायणशुक्लः "घटं जानाति, घटमिच्छतीत्यादौ च ज्ञानेच्छाविशिष्टो व्यापारो धात्वर्थः। वैशिष्ट्यञ्च स्वजनकत्व- स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधारतावद्वृत्तित्वोभयसम्बन्धेन" ।[11] एवमाह जयदेशमिश्रः " घटं जानातीत्यादौ घटमिच्छतीत्यादौ च ज्ञानेच्छाविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्व- स्वनिष्ठविषयतासम्बन्धा-वच्छिन्नाधेयतानिरूपिताधारतावद्वृत्तित्वोभय-

सम्बन्धेन"।[12]

चैत्रः ग्रामं गच्छति इत्यादिषु स्थलेषु गमेः संयोगविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठानुयोगित्वविशिष्ट-समवायसम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन। एवञ्चात्र अनुयोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धः। अत्र स्वशब्देन संयोगस्य ग्रहणं कर्तव्यम्। तथाहि स्वं संयोगरूपफलम्, तज्जनको नाम अनुकूलः पादविक्षेपादिव्यापारो भवति। एवञ्च व्यापारे स्वजनकत्वरूपः प्रथमः सम्बन्धः अस्ति। तस्मात् स्वजनकत्वसम्बन्धेन संयोगविशिष्टो व्यापारः सञ्जातः। एवमेव संयोगरूपफलं ग्रामे वर्तते अनुयोगित्वविशिष्ट-समवायसम्बन्धेन, एवमेव गमनरूपो व्यापारोऽपि कालिकसम्बन्धेन ग्रामे वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, ग्रामश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलम् अनुयोगित्वविशिष्टसमवायेन तण्डुले वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः अनुयोगित्वविशिष्टसमवायः, अतः आधेयता अनुयोगित्वविशिष्टसमवाय-सम्बन्धावच्छिन्ना। एवं च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं संयोगरूपं फलम्, तन्निष्ठा अनुयोगित्वविशिष्टसमवायसम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या तण्डुलनिष्ठा अधिकरणता, तद्वान् तण्डुलः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन तण्डुले व्यापारस्य विद्यमानत्वात्। एवं च प्रकृते अनुयोगित्वविशिष्टसमवायसम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य संयोगरूपरूपफलनिष्ठाधेयतावच्छेदकत्वे सति गमिधातुजन्योपस्थितीयविषयताश्रयत्वात्। एवञ्च गमिसमानार्थधातुघटितप्रयोगेषु अनुयोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धो भवति। तथा चाह लघुशब्देन्दुशेखरस्य वरवर्णिनीटीकाकारः " अत्राहुर्दण्डिभट्टाः फलाश्रयत्वञ्च फलतावच्छेदकसम्बन्धेन ग्राह्यम्, फलतावच्छेदकसम्बन्धश्च तत्तद्धातुभेदाद्भिन्नः। यथा ग्रामं गच्छतीत्यादावनुयोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः। अत एव संयोगस्य द्विष्ठत्वेन तस्य समवायेन ग्रामे इव चैत्रे सत्त्वेऽपि चैत्रो ग्रामङ्गच्छतीतिवच्चैत्रः स्वं गच्छतीति न प्रयोगः, अनुयोगित्वविशिष्टसमवायस्य चैत्रे असत्त्वात्" ।[13] तथा चोक्तं परमलघुमञ्जूषायाः ज्योत्स्नाटीकायाम् " ग्रामं

गच्छतीत्यत्रानुयोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः"।[14]

चैत्रः ग्रामं त्यजतीत्यादिषु स्थलेषु त्यजेः विभागविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वजनकत्वम्, स्वनिष्ठप्रतियोगित्वविशिष्टसमवायसम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन। एवञ्चात्र प्रतियोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धः। तथाहि विभागस्य जनकः पादविक्षेपादिव्यापारो भवति। एवञ्च तत्र व्यापारे स्वजनकत्वरूपः प्रथमः सम्बन्धः अस्ति। एवञ्च जनकत्वसम्बन्धेन विभागरूपफलविशिष्टो व्यापारः सञ्जातः। एवमेव फलम् अत्र विभागः, स च ग्रामे वर्तते प्रतियोगित्वविशिष्टसमवायसम्बन्धेन। कालिकसम्बन्धेन गमनरूपो व्यापारोऽपि ग्रामे वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, ग्रामश्च अधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलं प्रतियोगित्वविशिष्टसमवायेन ग्रामे वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः प्रतियोगित्वविशिष्टसमवायः, अत आधेयता प्रतियोगित्वविशिष्टसमवाय-सम्बन्धावच्छिन्ना। एवञ्च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं विभागरूपं फलम्, तन्निष्ठा प्रतियोगित्वविशिष्टसमवायसम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता या ग्रामनिष्ठा अधिकरणता, तद्वान् ग्रामः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन ग्रामे व्यापारस्य विद्यमानत्वात्। एवं च प्रकृते प्रतियोगित्वविशिष्टसमवायसम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य विभागरूपरूप- फलनिष्ठाधेयतावच्छेदकत्वे सति त्यजिधातुजन्योपस्थितीयविषयताश्रयत्वात्। एवञ्च त्यजिसमानार्थकधातुघटितप्रयोगेषु प्रतियोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धो भवति। तथा चोक्तं परमलघुमञ्जूषायाः ज्योत्स्नाटीकायाम् "एवं ग्रामं त्यजतीत्यादौ प्रतियोगित्वविशिष्टः समवायः फलतावच्छेदकः"।[15] अनयैव रीत्यान्येषु ग्रन्थेषु फलतावच्छेदकसम्बन्धविषये प्रतिपादितम्। विस्तरभयान्नोलिख्यते।

निष्कर्षः -

एवञ्च फलतावच्छेदकसम्बन्धेन फलाश्रयस्य कर्मसंज्ञा भवतीति सिद्धान्तः। अयञ्च फलतावच्छेदकसम्बन्धः तत्तद्धातुभेदात् भिद्यते। तथाहि घटं जानाति, इच्छति,

पश्यतीत्यादौ समवायः फलतावच्छेदकसम्बन्धः। तण्डुलं पचतीत्यादौ समवायः फलतावच्छेदकसम्बन्धः। ग्रामं गच्छति, व्रजतीत्यादौ अनुयोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः। वृक्षं त्यजतीत्यादौ प्रतियोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः। घटं नाशयतीत्यादौ प्रतियोगित्वसम्बन्धः फलतावच्छेदकसम्बन्धः। घटं करोतीत्यादौ स्वरूपसम्बन्धः फलतावच्छेदकः। उत्पत्तिरूपफलस्य स्वरूपसम्बन्धेनैव विद्यमानत्वात्। एवमेवान्यत्रापि बोध्यम्। इदञ्च दिङ्मात्रप्रदर्शनम्। अतः शास्त्ररसिकैः अनयैव दिशा तत्र तत्र प्रयोगानुरोधात् फलतावच्छेदकसम्बन्धः कल्पनीयः।

## सन्दर्भाः-

1. वादरत्नम्, पत्रसंख्या 148।
2. शास्त्रार्थरत्नावली, पत्रसंख्या 117।
3. प्रौढमनोरमासरलाव्याख्या, पत्रसंख्या 776।
4. लघुशब्देन्दुशेखरविजयाव्याख्या, द्वितीयभागः, पत्रसंख्या 631।
5. वादरत्नम्, पत्रसंख्या 148।
6. शास्त्रार्थरत्नावली, पत्रसंख्या 117।
7. शास्त्रार्थरत्नावली, पत्रसंख्या 117।
8. वादरत्नम्, पत्रसंख्या 148।
9. शास्त्रार्थरत्नावली, पत्रसंख्या 117।
10. वादरत्नम्, पत्रसंख्या 148।
11. वादरत्नम्, पत्रसंख्या 148।
12. शास्त्रार्थरत्नावली, संख्या 117।
13. लघुशब्देन्दुशेखरः, वरवर्णिनी, पत्रसंख्या 671।
14. परमलघुमञ्जूषा ज्योत्स्नाटीका, पत्रसंख्या 171।
15. परमलघुमञ्जूषा ज्योत्स्नाटीका, पत्रसंख्या 171।

## ॥ सन्दर्भग्रन्थसूची ॥


1. मिश्रः, जयदेवः। शास्त्रार्थरत्नावली। उमेशमिश्रः (सम्पादकः)। वाराणसी : वाणीविलासप्रकाशनम्। 1988।

2. शुक्लः, सूर्यनारायणः। वादरत्नम्। सूर्यनारायणशुक्लः ( सम्पादकः) । वाराणसी : चौखम्बासंस्कृतसीरिजऔफिस। 1932।

3. भट्टोजिदीक्षितः। प्रौढमनोरमा (रत्नप्रकाशिकाभावप्रकाशिकासरलयुता)। गोपालशास्त्रीनेने (सम्पादकः)। वाराणसी : चौखम्बासंस्कृतभवनम्। 2018।

4. नागेशभट्टः। लघुशब्देन्दुशेखरः(सटिप्पणीटीकापञ्चकोपेतः)। प्रो. बालशास्त्री (सम्पादकः)। वाराणसी : चौखम्बासुरभारतीप्रकाशनम्। 2013।

5. नागेशभट्टः। परमलघुमञ्जूषा (ज्योत्स्नाटीकासमलङ्कृता)। कालिकाप्रसादशुक्लः (व्याख्याकर्ता सम्पादकश्च)। बडौदा संस्कृतमहाविद्यालयः, महाराजसयाजिरावविश्वविद्यालयः

❋ ❋ ❋